# प्राङ्नव्यविहितमत्वर्थविधायकसूत्रसर्वेक्षणम्

**डॉ. अशोक कुमार झा**
व्याख्याता–व्याकरण
राजकीय धूलेश्वर आचार्य संस्कृत महाविद्यालय
मनोहरपुर (जयपुर)

पाणिनीय – व्याकरणविश्लेषणस्य मार्गद्वयं प्रसिद्धम्, नव्यो मार्गः, प्राचीनमार्गश्च प्राचीने लक्षणानुसारिणि विश्लेषणे प्रवृत्तानां काशिकाकारादीनामभिधानं सादरं स्मर्यतेऽपरतो नव्येषु दीक्षितनागेशादीनाम्। मत्वर्थप्रत्ययानुशासनविधावपि प्रवृत्तयोरुीयोरपि समीक्षाप्रकारस्तन्यते। लक्षणानुसारिव्याख्याकृत्सु काशिकावृत्तिकारो यथाक्रमं प्राप्तस्य मत्वर्थप्रत्ययस्य सूत्राणि भाष्यानुगुण्येन व्याचख्यौ। यथा भाष्ये ''तदस्यास्त्यस्मिन्निति सूत्रस्य अस्य अस्मिन्निति उभयार्थप्रयोजनं विवृत्तम्। तत्र प्रदीपकारो भाष्योक्तं विवृण्वन्'' शाखावान् वृक्ष इत्युदाहरणं प्रदर्श्य आधारसम्बन्धयोरेकत्रान्वयञ् सूचयन् अन्यतरोपादानस्य प्रयोजनं ब्रूते।[1] इह यदा सम्बन्धः सर्वकारकपूर्वको, नाधारपूर्वक एव। यथा देवदत्तस्य गाव इति क्रयप्रतिग्रहादिक्रियाविषयककर्तृत्वपूर्वकः स्वस्वामिसम्बन्धस्तदा सप्तम्युपादाने कारकान्तरपूर्व–सम्बन्धाग्रहणाद् अस्येति षष्ठ्यर्थोऽप्युपादानीयः। तथा षष्ठ्यर्थमार्गनिर्देशे यत्राधिकरणं शेषसम्बन्धनिमित्तसम्बन्धत्वेनअविवक्षितम्। वृक्षा अस्मिन् पर्वते सन्तीति तत्र प्रत्ययो न स्यात्। न ह्यत्र कारकपूर्वकः शेषसम्बन्धो दृश्यते वृक्षैः पर्वतस्य अनारम्भात्। नावयवावय–विभावः, आनन्तर्यादिसम्बन्धसम्भवेऽपि तत्र मत्वर्थीयैर्न भाव्यम् तस्मादुभयोपादानम्। कैयटेन कारकप्रकरणे गौणमुख्यन्यायस्य अनाश्रयणमुक्त्वा[2] गौणाधारस्यापि अधिकरणसंज्ञात्वम् परामृश्य अत्र व्याख्याने तत्सम्बन्धो विहितः। तद्यथा सप्तम्युपादानेऽपि गोमान् देवदत्त इति सिध्यत्येव। नैतदस्तिशक्तिमात्रनिर्देशे मुख्य एवाधिकरणे मत्वर्थीयाः स्युः, वृक्षवान् पर्वत इत्यादौ न तु गौणे गोमान् देवदत्त इत्यादौ। कारकप्रकरणे हि ''साधकतमं करणम् इति तमप् ग्रहणसामर्थ्यात् गौणमुख्यन्यायस्यानाश्रयेण'' अयन्तु प्रत्ययविधिरिति स्यान्नयायाश्रयणमिति षष्ठीनिर्देशोऽपि कृतः।

पदमञ्जरीकारः कैयटाभिप्रायमेवोन्नयन् तदुक्तात्किमप्यधिकं नाभिधत्ते।[3] तथाऽपि यद्यस्य भवति तस्मिन्नपि तद्भवति, यच्च यस्मिन्न भवति तस्यापि तद्भवति, यथा वृक्षस्य शाखा, वृक्षे शाखा इति। तत्रान्यतरनिर्देशेनैव

[1] तदस्यास्त्यस्मिन्निति सूत्रस्थभाष्यप्रदीपे कैयटः।
[2] अत्रैव प्रदीपकारः कैयटः।
[3] अत्रैव कैयटाभिप्रायं समर्थयति पदमञ्जरीकारः।

सिद्धं किमर्थमुभावर्थौ निर्दिश्येतेनैतयोरवश्यम्भाविसमावेशः। न्यासकारो विषयं स्फोरयन् गावो गङ्गायां भवन्ति न च ते तस्याः, तथा देशान्तरगतोऽपि पुत्रो देवदत्तस्य च भवति न चाऽसौ तत्र इत्याह।[4]

कैयटोक्तमाविष्कुर्वन् नागेशभट्टः स्वोद्योत इत्थं लिखति–प्रत्ययविधौ गौणमुख्यन्यायस्य आश्रयणे हेतुं च प्रस्तौति न चेह गौणग्रहणे ज्ञापकमस्ति इति भावः। अन्ये त्वेवं हि घोषवती गङ्गा, काकवद्गृहम् इत्याद्यनापत्तिः। व्यापकाधारस्यैव मुख्याधिकरणत्वमिति स्वरितेन साधकतममित्यादौ भाष्ये स्पष्टमुक्तेस्तस्मादधिदेवदत्ते पञ्चाला इत्यादावाधृता इत्यध्याहारेण बौद्धमाधारत्वम्। तच्च यत्र तथाबुद्धिरस्ति तत्रास्तु सा च अधिशब्दयोगे एव नान्यत्र, इति।

तत्त्वबोधिनीकारो बालमनोरमाकारश्च अस्य–अस्मिन्नित्युभयोरर्थयोः पृथक्–पृथगुपादाने नोक्तवन्तौ किमपि। किन्तु लधुशब्देन्दुशेखरेऽत्र गोमान् देवदत्त इत्यादौ आधाराधेयभावाभावात् षष्ठ्युपादानं 'गोमान् देशः' इत्यादावधिकरणत्वेऽपि सम्बन्धाभावेन षष्ठ्प्राप्त्या सप्तम्युपादानमिति नागेशभट्टः। अस्ति इति पदप्रयोजनं कथयता भाष्यकारेण इत्थमुक्तम् सत्तायामर्थे प्रत्ययो यथा स्यात् पुनस्तेनैव सत्तापदस्य सम्प्रति सत्ता इत्यर्थं विधाय भूतभविष्यत्सत्तायामित्यर्थे गावोऽस्यासन्, गावोऽस्य भवितारः इत्यादौ मतुबादयो निवारिताः, यतो हि पदार्थः सत्तां न व्यभिचरति, सत्तामन्तरेण पदोच्चारणमपि न सम्भवति, सर्वविधशब्दप्रवृतौ सत्ता एव कारणं भवति तत्र सत्तायां प्रत्ययो यथा स्यादित्यस्थार्थं द्योतयन् कैयट उक्तवान् यत् सत्तायां वर्तमानात् सत्तोपाधिकार्थाभिधायिनः प्रत्ययो यथा स्यात् कैयटोऽत्र यावद्बुद्ध्या पदार्थो न विषयीकृतस्तावत्पदस्य प्रयोगाभावः, तस्माद् बुद्धिसत्तासमाविष्टोऽर्थो विधिनिषेधजननादिभिः सम्बध्यते। वृक्षोऽस्ति, वृक्षो नाऽस्ति, वृक्षो जायते इति अत्यन्तासतोऽपि बहिः शशविषाणादीनर्थान् बुद्धया विषयीकृत्य शशविषाणादिप्रयोगः, तस्मात् बुद्ध्यारूढोपचरिता सत्ता शब्दप्रयोगाश्रयत्वादव्यभिचार इत्यर्थ इत्याह।

तत्वबोधिनीकारेणोक्तं यद् अस्ति इति पुरुषवचने अविवक्षिते, कालस्तु विवक्षितः, धने गते भाविनि वा धनवानयम् इति प्रतीत्यभावात्।

गुणवचनेभ्यो मतुपो लुगिष्टः, इति वार्तिकं व्याचरक्षाणः कैयटो गुणशब्देन कस्य ग्रहणं न वेति विचारं कृतवान्। शुक्लादय एवाभिन्नरूपा गुणे तद्वति च द्रव्ये वर्तमाना गृहयन्ते न तु रूपादयः, सर्वथा गुणमात्रवचनाः। अव्यतिरेकात्सिद्धं न गुणो गुणिनं व्यभिचरति इति भाष्यवचनमनुधावन् स आह, गुणगुणिनोः सोऽयमित्यभिसम्बन्धा–दभेदाध्ववसायान्मतुप उत्पत्तिरेव नाऽस्ति।

[4] अत्रैव न्यासकारः।

तत्वबोधिनीकारस्तु एतादृशगुणवचनत्वस्वीकाराद् वस्त्रं रूपमित्यादि न भवति इत्यप्युक्तवान् बालमनोरमाकारस्तु ''अरुणयापिङ्गाक्ष्यैकहायिन्या सोमङ्क्रीणाति'' इति वचनसम्बद्धम् अध्वरमीमांसाकौतुहले कृतं प्रपञ्चं स्मरति।

अत्रारुण्यस्यामूर्तत्वात् क्रयणभावनां प्रति करणत्वासम्भवात् तामुद्दिश्य तद्विधानासम्भवाद् गुणवाचकस्याप्यस्य लक्षणया द्रव्यबोधकत्वसम्भवेन क्रयात्पृथग्भूतः प्राकरणिकद्रव्याण्युद्दिश्य तत्परिच्छेदकत्वेनारुण्यरूपो गुणो विधीयते – 'येन द्रव्येण किञ्चित् क्रियते तदरुणगुणकेनेति। तृतीयया गुणस्यैव करणत्वं क्रयं प्रति विस्पष्टं गम्यते तच्च द्रव्यद्वारेण युज्यज इति सिद्धान्त उक्तः। यद्यपि गुणस्यामूर्तत्वात् क्रयं प्रति साधनत्वं न सम्भवति, तथापि द्रव्यपरिच्छेदद्वारा सम्भवत्येव, तथा चायमर्थो भवति अरुणपरिच्छिन्नेन द्रव्येण क्रयं कुर्यादिति। एवं श्रौतस्यैव गुणस्यैकवाक्यत्वे सम्भवति, लक्षणा वाक्यभेदश्च न युज्येते, क्रियार्थत्वे च तदीयद्रव्य एवं निवेश इत्यभिहितं पार्थसारथिमिश्रेरित्यलं विस्तरेण।

एवञ्च यौगिकानां गोमत्पिङ्गाक्ष्यादिपदानां तद्धटकस्य प्रत्ययस्य च न किञ्चिद्द्रव्यवाचक–त्वसाधकम्, तत्प्रतीतेराक्षेपादिनोपपत्तेरिति तेषां तद्वाचित्वं न स्यादिति भावः।

शेखरकारस्तु लुगिष्ट इत्यत्र इष्टपदार्थं बोधयन् तन्महिम्ना गम्यमर्थञ्चैवं प्रस्तौति अयञ्च लुक् द्रव्यवाचकसमभिव्याहार एव। वस्तुतोऽनेन भाष्ये कृतस्य एतद्वचनप्रत्याख्यानस्य कारणं प्रदर्शितम् भेदपक्षेऽभेदभेदो वोभयथा कथन्नेदं वचनमावश्यकमिति। मादुपधायाश्च इति सूत्रे वह्निमद्वानिति नैयायिक प्रयोगस्य असाधुत्वे जश्त्वस्याप्रवत्तिं मत्वान्तान्मतुपो निषेधञ्च वक्ति तत्त्वबोधिनीकारः। गोधुङ्मान् इत्यत्र 'झयः' इति तत्वापत्तिं स्मृत्वा पूर्वत्रासिद्धमिति सूत्रस्य अधिकारसूत्रत्वफलं प्रस्तौति। नागेशभट्टस्तु मतुपो मकारस्य स्थाने जायमाने वकारे आनुनासिको वकारः कथन्नेति भाव्यमानोऽण् सवर्णान् न गृहणाति इति परिभाषां प्रयोजयन् उत्तरमुखेन समाधत्ते, विधीयमानत्वेन सवर्णाग्राहकत्वान्मस्य नानुनासिको वकारः इति।

प्राणिस्थादिति सूत्रे प्राणिपदेन लोकप्रसिद्धशरीरादिसङ्घातं एवं गृहीतः इति कैयटः। तत्र चेतन्यापगमेऽपि प्राणिव्यवहारस्य रूढत्वान्मृतावस्थायामपि चूडालादिव्यपदेशप्रवृत्तिरिति।

हरदत्तस्तु चूडावान् वृक्ष इति प्रत्युदाहरति वृक्षस्य प्राणित्वं मुखनासासञ्चारिवायोरेव प्राणत्वस्वीकारात् नास्तीति उक्त्वा तत्त्वबोधिनीकारेण हरदत्तः प्रत्याख्यातः।

शेखरकारेण तु शिखाशब्दस्य व्रीह्यादित्वे चूडावती प्रतिमा इति उदाहरणं युक्तं मन्यते।

सिध्मादिभ्यश्च इति सूत्रे भट्टोजिदीक्षितेन लज्वा स्यादिति उक्तस्य वेत्यस्य चकारार्थे प्रयोग इति बालमनोरमाकारः।

लोमादिपामादि इति सूत्रे लोमपामपृच्छादिभ्य इति न्यासस्यैव 'नन्दिग्रहिपचादिभ्य' इतिवत् सुपठत्वमुक्तवान् तत्त्वबोधिनीकारः।

प्रज्ञा श्रद्धार्चाभ्य इति सूत्रे काशिकाकारो वृत्तिपदमपि सूत्रे क्षिप्तिम् इति विशेषः। किन्तु वृतेश्चेति वक्तव्यम् इति भाष्यवचनात् तस्य पृथग्वचनतया कथनं युक्तम्।

'दन्तुर' इति प्रयोगस्य निम्नोन्नतेऽर्थे लक्षणयैव साधुत्वमिति प्रसक्तसूत्रे नागेशः।

अत इनिठनौ इति सूत्रे भाष्ये उक्तस्य 'एकाक्षरात्कृतो जातेः सप्तम्यां न तौ स्मृतौ' इति वचनस्य काशिकाकृता सोदाहरणं स्वरूपं प्रस्तूय तदपवादतया कार्यी, हार्यी इत्यादि प्रदर्शितम्।

तत्त्वबोधिनीकारेणापि तत्स्मृतम्। तपरकरणप्रयोजनं ब्रुवाणः काशिकाकृत् श्रद्धावान् इत्युदाहरति। एकञ्च तत् शतञ्चेति कर्मधारयादेव ठञ् न तु षष्ठीतत्पुरुषाद् बहुव्रीहेर्द्वन्द्वाच्च तदनभिधानाद् भवतीति हरदत्तादयः। एकद्रव्यवानित्यस्य असाधुत्वमेव यद्वा एकेन द्रव्यवान् इति विग्रहेण साधनीयम्। एकदण्डीति प्रयोगस्यापि साधुत्वम् एकदेशिनैकाधिकरण इति निर्देशज्ञापने इनिरपि क्वचिद्भवति इति विवृत्त्या विधेयमिति तत्त्वबोधिनीकारः।

तप्पर्वमरुद्भ्यामित्यत्र प्रत्ययस्य पित्वे नत्वे च महान् विवादः प्रदर्शितः। एकतो भट्टोजिदीक्षितेन मनोरमायां महता प्रबन्धेन नित्वं निराकृतम्, अपरतो हरदत्तेन काशिकाकारेण च नित्वस्य फलप्रदर्शनमुखेन नित्वन्यासस्यैव साधुत्वमुक्तम्। नागेशोऽपि स्वशब्देन्दुशेखरे सविस्तरं नित्वस्यैवौचित्यं स्थापितम्। तच्च कैयटेनापि समर्थितम्।

अर्थाच्चासन्निहिते–इति वार्तिकमनुधावन् नागेशभट्टः किमपि विशिष्टम् अभिदधानो वर्तते अर्थशब्दोऽत्र धनवाची। कालतोऽत्रासन्निधि र्न देशतः। तत्र विरोधादस्तीत्यस्याऽसम्बन्ध इत्याप्राप्त एवेनिर्विधीयते। सत्तोपाधिकादिनिठनोरभावः, अनभिधानात्। अतएव असन्निहिता इति किमर्थम्? अर्थवान् इति भाष्ये उक्तम्। अर्थी समर्थो विद्वान्यः शास्त्रानुपहतश्च यः इति त्वार्षम्। अर्थनमर्थ इति क्रियाशब्दात्सत्तोपाधिकादिनिठनौ

भवत एव। मतुप्तु न अनभिधानात्। तेनार्थिकप्रत्यर्थिकौ धान्यार्थीत्यादि च सिद्धम्। धान्यकरणकप्रार्थनावानित्यर्थः। यत्तु मीमांसावार्तिककारैर्मतुबादेर्द्रव्यवाचकतासाधकयुक्ति–रूपन्यस्तामतुबादेर्नसम्बन्धसामान्यं वाच्यम्, गोमद्दण्ड्यादिपदानां पर्यायतापत्तेः, न सम्बन्धविशेषः, तत्र सम्बन्धितरूप एव हि विशेषोऽतः सोऽवश्यं वाच्योऽनभिहितस्य व्यावर्तकत्वासम्भवात्, प्रातिपदिकेनैकसम्बन्ध्यभिधानेऽपि सम्बन्धस्योभयनिरूप्यत्वेन द्वितीयाभिधानावश्यकत्वे उभयवाचकत्वे प्रत्युत गौरवं स्यात्, अतो लाघवाद् द्रव्यमेव मतुबादिवाच्यं तेनाक्षेपाल्लाभे न सम्बन्धे शक्तिः। उक्तञ्च–

**र्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते।**

**न हि सम्बन्धवाच्यत्वं सम्भवत्यतिगौरवात्।।**

अत्राहु वृहद्भूषणकृतः – मतुबादीनां द्रव्यसामान्यवाचित्वे पर्यायतापत्तेस्तुल्यतया विशेषत एव तद्बोधकत्वाङ्गीकार आवश्यकः। गोमत्पदाग्दोविशिष्ट इतिवद् गोसम्बन्ध इति बोधो निष्प्रत्यूह एव शब्दशक्तिस्वभावादेव–भावनापदोपात्तभावनाया आश्रयानाक्षे–पकत्वमाध्या–तोपात्तायास्तस्यास्तदाक्षेपकत्वमितिवत्–सम्बन्धपदोपात्तसम्बन्धस्याश्रयानाक्षेपकत्वेऽपि मतुबाद्युपात्तस्य तस्य तदाक्षेपकत्वं सम्भवति।

अत्रेदं बोध्यम्–संयोगसम्बन्धेनाधिकरणकारकस्य सम्बन्धत्वेन न विवक्षा, अतएव तदस्यास्त्यस्मिन् इति सूत्रे 'वृक्षवान् पर्वत' इत्यादिप्रयोगसिद्धये सप्तम्युपात्ता, 'गोमान् देवदत्त इत्याद्यर्थञ्च' षष्ठीति सूत्रे भाष्य उक्तम्। नन्वधिर्ब्रह्मदत्ते पञ्चाला इत्यत्राधिकरणसप्तमी 'आधृतास्ते तत्र भवन्ति' इत्यादिना ग्रन्थेन यस्मादधिकम्–इति भाष्ये स्वीकृता, तद्वदत्रापि गावः सन्त्यस्मिन्निति सप्तमी भविष्यतीति किमर्थं षष्ठ्युपादानमिति चेन्न। स्वस्वामिभावविवक्षायामपि गोमानित्यादिप्रयोगसिद्धये तदुपादानादिति मञ्जूषायां विस्तरः।

मीमांसकैकदेशिमते मत्वर्थीयानां सम्बन्धवान्चकत्वेऽपि तदाक्षिप्ताश्रयविशेष्यकबोधस्यैव तैरभ्युपगमे तन्मतेऽपि–

प्रकृतिजन्यबोधविशेष्यांशे दण्डादीनामप्रकारत्वेन प्रयोजनविरहादिति विभावनीयम्।

परे तु–इनादेः सम्बन्धावाचकत्वेऽपि दण्ड्यादिपदस्य सम्बन्धज्ञानादेव प्रवृत्तिरितिसम्बन्धस्यैव प्रवृत्तिनिमित्ततया त्वादिवाच्यत्वसम्भव इति प्रतिपन्नाः।

**क्रीडायां णस्तदस्यास्तीत्यादावेषैव दिक् स्मृता।।**

**वस्तुतो वृत्तिरेवेति नात्रातीव प्रयत्यते।।**

तदस्यास्त्यस्मिन्निति सूत्रेण प्रथमान्तादस्त्यर्थोपाधिकात्सम्बन्धिन्यधिकरणे च मत्वर्थीया विधीयन्ते। यद्यप्यस्येत्युक्तेः षष्ठ्यर्थसम्बन्ध एव मतुबादिविधानमाभाति, तथापि 'गोमांश्चैत्र' इति सामानाधिकरण्यानुरोधात्सम्बन्धिवाचकतैवेत्युक्तं प्राक्। एवञ्च गोमानित्यादौ गोनिरूपित वामित्वसम्बन्धवानित्याद्यन्वयबोधः।

न च – **"भूमनिन्दाप्रशंसासु नित्ययोगेऽनिशायने।**
**सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः।।"**

इति सम्बन्धसमकक्षतया भूमाद्यर्थानामप्युपादानात्तेषामपि मतुबादिशक्यत्वमिति शङ्क्यम्, स्यादेवं यदि तेष्वर्थेषु मतुबादीनां विधायकं सूत्रादिकमुपलभ्येत, किन्तु प्रयोगोपाधित्वमेव तेषामस्त्यर्थवत् गवादिपदानां बहुत्वादिविशिष्टलाक्षणिकतयैव भूमादिप्रतीतिसौलभ्याच्च। अन्ये त्वस्तिशब्दान्मतुबर्थं तद्ग्रहणमित्याहुरित्यन्यत्र विस्तरः।

सम्बन्धत्वेन सम्बन्धस्य षष्ठीवाच्यत्वे पुरुषस्य दण्ड इत्यादौ दण्डस्य पुरुष इत्यादिरपि प्रयोगः स्यात्। दण्डी पुरुषो, रूपवान् घट इत्यादिवद्दण्डरूपादेः पुरुषघटाद्यनाधारत्वेऽपि पुरुषी दण्डो घटवद्रूपमित्यादिः प्रयोगो दुर्वारः, तदत्रास्तीत्यर्थ इव तदयेत्यर्थे मतुपो विधानात् दण्डरूपादिपदोत्तरषष्ठ्या चैत्रघटादिनिष्ठतदर्थसम्बन्धप्रतिपादने तदुत्तरमत्वर्थीयस्य प्रसङ्गादिति चेत्। विशिष्टानां केषाञ्चित्सम्बन्धानां षष्ठ्यर्थतोऽपगमेऽपि घटस्य रूपमित्यादिप्रयोगानुरोधेन समवेतत्वादेः षष्ठ्यर्थताया आवश्यकत्वेन हस्तस्य चैत्रः, चैत्रवान् हस्तः, शाखाया वृक्षः, वृक्षवती शाखेति कथन्न प्रजुज्यंते पूर्वप्रयोगाभावदिति चेत्तुल्यम्।।